# RASHTRIYA SANSKRIT VIDYAPEETHA, TIRUPATI (A.P.)
(University established under section 3 of UGC Act, 1956)
(Accredited at A+ Level by NAAC)

डा. चक्रवर्त्तिरङ्गनाथ:
Dr. C.Ranganathan
समायोजक: / Co-ordinator

डा. भारतभूषण रथ:
Dr. Bharat Bhusan Rath
अतिरिक्तसमायोजक:/ Addl.Co-ordinator


**वाग्वर्धिनीपरिषत्-२०१३-१४**
VAGVARDHINI PARISHAT- 2013-14

## ५२ तमी अखिलभारतीयशास्त्रीयस्पर्धा:

दिनाङ्क: - 4/10/2013

सेवायाम्

______________________

______________________

______________________

**विषय: -** राज्यस्तरीयशास्त्रीयस्पर्धा-आयोजन-आमन्त्रणादिसम्बन्धे ।

**स्पर्धादिनाङ्क: -** १४-१५ दिसम्बर २०१३। **स्थानम् -** राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: ।

मान्या: ! प्रणमाम:

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षमिव अस्मिन्नपि वर्षे अखिलभारतीयशास्त्रीयस्पर्धा: समायोजयिष्यन्ते। तत्र भागग्रहणाय राज्यस्तरीयस्पर्धायाम् उत्तीर्णता अपेक्ष्यते । संवत्सरेऽस्मिन् आन्ध्रप्रदेशस्य राज्यस्तरीयस्पर्धाचालनाय तिरुपतिराष्ट्रियसंस्कृतविद्यापीठमधिकृतमस्ति ।

अत इदं विनिवेद्यते यत् - आन्ध्रप्रदेशे पारम्परिकरीत्या अधीयाना: छात्रा:, पारम्परिकविद्यालयीया: छात्रा: अक्टोबरमासस्य एकत्रिंशत् दिनाङ्कात् (31-10-2013) पूर्वं प्रदत्तां नियमावलिं सम्यक् अवलोक्य नियमान् विज्ञाय स्पर्धीयशास्त्रविषयांश्च सञ्चित्य स्वस्वविद्यालयद्वारा वा, स्वस्वगुरुकुलद्वारा वा, स्वसंस्थाद्वारा वा, स्वस्वगुरुद्वारा वा आवेदनपत्रं प्रपूर्य अधोदत्तसङ्केतं प्रति प्रेषयेयु: इति । ई-मेल् द्वारापि छात्रस्पर्धिनां सूची प्रेषयितुं शक्यते । अन्तिमा तिथि: 31-10-2013।

अत्र प्रथमस्थानभाज: छात्रा: एव अखिलभारतीयस्पर्धासु भागं ग्रहीतुमर्हा: भविष्यन्ति ।

### नियमा:

१. छात्रैस्सह एक एव मार्गदर्शक: आगन्तुमर्ह: ।
२. द्वितीयश्रेणीगमनागमनव्यय: संस्थानपक्षत: प्रदीयते।
३. आवास-भोजनव्यवस्था च कल्पयिष्यते ।
४. निमन्त्रणछात्रसंख्या निर्णयादि आयोजकसंस्थाधीनम्।
५. योग्यानेव छात्रान् मार्गदर्शका: आनयेयु: । अनर्हाणां छात्राणां कृते मार्गव्ययादिकं न दीयते ।

YES, WE CAN

प्रणामपुरस्सरम्

भवदीय:
चक्रवर्ति रङ्गनाथ (signature)
डॉ. चक्रवर्ति रङ्गनाथ:


Co-ordinator
Vagvardhini Parishat
Rashtriya Sanskrit Vidyapeetha, Tirupati- 517 507
Mob.- 09440919186

**सम्पर्कदूरवाणी**

**Dr. Bharat Bhushana Rath**
Addl. Co-ordinator
Vagvardhini Parishat
Mob- 08897426243, 09440919186

E-mail : - paramatmabharat@gmail.com, rsudhanvan@gmail.com

# परिष्कृत-नियमावलिः
## 2013-2014

अवधेयम्- रा.सं.संस्थानस्य जालपुटे (website) 1.4.2013 तमे दिनाङ्के निवेशित-नियमावल्याः नवमे/दशमे पृष्ठे राज्यस्तरीय-स्पर्धासूच्यां साहित्यभाषणम् इत्यस्य अधः 'रसगङ्गाधरः (प्रथमाननम्)' इति अनवधानात् मुद्रितम् आसीत्। तस्मिन् स्थाने अस्यां परिष्कृतनियमावल्यां निर्दिष्टरीत्या 'काव्यप्रकाशः (1 तः 3 उल्लासाः)' इति परिष्कृत्य पठेयुरिति निवेदनम्। मुद्रितनियमावल्यां परिष्कृतनियमाः एव निर्दिष्टाः।

# ५२ तमी अखिलभारतीया शास्त्रीया स्पर्धा
# विभिन्नराज्येषु
# राज्यस्तरीय-शास्त्रीयस्पर्धाः च


**राष्ट्रिय-संस्कृत-संस्थानम्**

(मानितविश्वविद्यालयः)

भारतशासन-मानवसंसाधन-विकासमन्त्रालयाधीनम्

नवदेहली

# पुरोवाक्

भारतशासनपक्षतः राष्ट्रियसंस्कृतसंस्थानेन संस्कृतविश्वविद्यालयेषु पारम्परिकसंस्कृतशिक्षणसंस्थासु गुरुकुलेषु वा शास्त्राणि अधीयानानां प्रतिभाः प्रोत्साहयितुं, तेषाम् अधीतिबोधाचरणप्रचारणेषु प्रकर्षमाधातुं च प्रतिवर्षम् अखिलभारतीय-शास्त्रीयस्पर्धा आयोज्यते। आरम्भवर्षेषु अखिलभारत-संस्कृतभाषणस्पर्धा इति व्यवहृतः अयं कार्यक्रमः सम्प्रति भाषणेतर-शास्त्रीयस्पर्धानामपि संयोजनात् अखिलभारत-शास्त्रीय-स्पर्धा-नाम्ना सञ्चाल्यते। अस्य स्पर्धायोजनस्य 51तमः कार्यक्रमः हिमाचलप्रदेशे बलाहर इत्यत्र प्रतिष्ठिते राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरे भव्यतया सम्पन्नः। विद्वद्भिः सह समालोच्य, गत पर्याये भाषणस्पर्धायाः शास्त्रार्थविचार-स्पर्धायाश्च स्वरूपमीषत् परिष्कृतमासीत्। तच्च स्पर्धालूनां गुणस्तरवर्धनाय अकल्पत इत्यस्मदभिप्रायः। अस्य स्पर्धाकार्यक्रमस्य 52 तमम् आयोजनम् मध्यप्रदेशे राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे भविष्यति। ऐषमः पर्याये अक्षरश्लोकीनिमित्तं निर्दिष्टग्रन्थसूच्यां शिवमहिम्नस्तोत्रं महिषासुरमर्दिनी-स्तोत्रं, रा.सं.संस्थानेन प्रकाशितं शिवशतकं च नूतनतया संयोजितानि इत्यवधेयम्। अखिलभारतीय-स्पर्धानां राज्यस्तरीयस्पर्धानां च विवरणसहिता नियमावलिः, नामाङ्कनप्रपत्राणि च एतस्यां पुस्तिकायां प्रकाश्यन्ते। स्पर्धासु भागग्रहणार्थं समुत्सुका युवानः पण्डिताः परिष्कृतां/संवर्धिताम् इमां नियमावलिं सूक्ष्मतया परिशील्य स्वस्वसंस्थामाध्यमेन नामाङ्कनं कारयेयुः। स्पार्धार्थिभ्यो भूयः शुभकामनाः वितरामि।

**–राधावल्लभः त्रिपाठी**

कुलपतिः

◆◆◆

# विषयसूची


| | | |
|---|---|---|
| 1. | अखिलभारतीय(राष्ट्रस्तरीय)-शास्त्रीयस्पर्धानियमावलिः | 3-7 |
| 2. | अखिलभारतीयस्पर्धासु भागग्रहणाय प्रक्रिया | 7 |
| 3. | शलाकापरीक्षाविधानम् | 8 |
| 4. | राज्यस्तरीय-शास्त्रीयस्पर्धानियमावलिः | 9-13 |
| 5. | राज्यस्तरीय-स्पर्धासु भागग्रहणाय नामाङ्कनार्थं प्रक्रिया | 13 |
| 6. | राज्यस्तरीय-शास्त्रीयस्पर्धायोजनस्थानानि | 14-15 |
| 7. | अवधेयांशाः | 16 |
| 8. | प्रमुखाः तिथयः | 16 |
| 9. | राज्यस्तरीयस्पर्धायै नामाङ्कनाय प्रपत्रम्-1 | 17-19 |
| | प्रपत्रम्-2 | 21 |
| | प्रपत्रम्-3 | 23 |

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# 52तमी अखिलभारतीया शास्त्रीया स्पर्धा

## जनवरी/फेब्रवरी 2014, रा.सं.संस्थानम्, भोपालपरिसरः,

# नियमावलिः

## I. भाषणस्पर्धा

<table>
<tr><th>क्र.सं स्पर्धायाः नाम<br>स्पर्धार्थिना अध्येतव्यः ग्रन्थश्च</th><th>भागग्रहणाय अर्हता/स्पर्धाविवरणम्</th><th>पुरस्कारः</th></tr>
<tr><td>1. व्याकरणभाषणम्<br>परिभाषेन्दुशेखरः (असिद्धं बहिरङ्गम् इति परिभाषान्तः)</td><td rowspan="8">• राज्यस्तरीयस्पर्धायां चिताः, संस्कृतविश्व-विद्यालयेषु/पारम्परिकसंस्कृतशिक्षणसंस्थासु आचार्यकक्षायां/तत्समकक्षायाम् (पारम्परिक-पद्धतौ) अथवा शास्त्रिकक्षायाः तृतीयवर्षे/ तत्समकक्षायाः अन्तिमवर्षे कस्मिंश्चिदपि शास्त्रे (पारम्परिकपद्धतौ) अधीयानाः छात्राः भागग्रहणाय अर्हाः।<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणं प्रत्येकं विषये (शास्त्रे) भाषणस्पर्धायाम् एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति।<br>• एकः स्पर्धालुः भाषणेषु एकस्मिन् विषये एव भागं ग्रहीतुमर्हति अर्थात् एकः स्पर्धालुः शास्त्रद्वये भाषणस्पर्धायां भागग्रहणाय नानुमन्यते।<br>• शलाकापरीक्षायां/कण्ठपाठस्पर्धासु/शास्त्रार्थ-विचारे वा यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br>• भाषणार्थं निर्दिष्टं (वामतः स्तम्भे निर्दिष्टं) तत्तच्छास्त्रसम्बद्धं ग्रन्थं सम्यगधीत्य स्पर्धालुः उपस्थितः भवेत्। स्पर्धारम्भात् एकघण्टापूर्वम् तेभ्यः ग्रन्थेभ्यः प्रतिशास्त्रं कश्चन विषय-विशेषः भाषणीय-विषयस्य शीर्षकत्वेन उद्घोष्यते।<br>• भाषणाय षट्-निमेषात्मकः (5+1) कालः दीयते। [पञ्चनिमेषाणामन्ते सूचना दीयते। तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम्।]<br>• भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः।</td><td rowspan="8">I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br><br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br><br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च।</td></tr>
<tr><td>2. साहित्यभाषणम्<br>काव्यप्रकाशः (1 तः 3 उल्लासाः)</td></tr>
<tr><td>3. न्यायभाषणम्<br>न्याससिद्धान्तमुक्तावली (शब्दखण्डमारभ्य आन्ता)</td></tr>
<tr><td>4. साङ्ख्य-योगभाषणम्<br>योगसूत्र-व्यासभाष्यम् (प्रथमपादः)</td></tr>
<tr><td>5. मीमांसाभाषणम्<br>जैमिनीयन्यायमाला (प्रथम-द्वितीयाध्यायौ)</td></tr>
<tr><td>6. वेदान्तभाषणम्<br>वेदान्तपरिभाषा (आगमपरिच्छेदात् आन्तम्)</td></tr>
<tr><td>7. धर्मशास्त्रभाषणम्<br>मनुस्मृतिः (नवमाध्यायः कुल्लूकभट्टव्याख्यासहितः)</td></tr>
<tr><td>8. ज्यौतिषभाषणम्<br>मुहूर्तचिन्तामणिः (सम्पूर्णः)</td></tr>
</table>

अनुवर्तते....

## II. शलाकापरीक्षा

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **9. साहित्यशास्त्रशलाकापरीक्षा**<br>**ध्वन्यालोकः** (प्रथमद्वितीयोद्योतौ सम्पूर्णौ) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां/गुरुकुले वा अधीयानाः/कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाः वा छात्राः। (गुरुकुले अधीयानानां/विद्वत्सन्निधौ स्वाध्यायरतानां वयोमितिः - 01-01-2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रत्येकं शास्त्रे शलाकापरीक्षायाम् एकस्मात् राज्यात् (प्रतिस्पर्धालुगणम्) एकस्यैव अवसरः।<br>• एकस्य छात्रस्य एकस्मिन् शास्त्रे एव शलाकास्पर्धायाम् अवसरः कल्प्यते।<br>• भाषणस्पर्धायां कण्ठपाठस्पर्धायां/शास्त्रार्थ-विचारे वा यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br>• **शलाकापरीक्षाविधानविषये विवरणं अस्याः पुस्तिकायाः पृ.सं-8 इत्यत्र अवलोकनीयम्।** | **उत्तीर्णेषु प्रथम/द्वितीय/तृतीय-स्थानभाजां कृते पुरस्कारः-**<br>I. स्वर्णपदकम् + स्वर्णशलाका + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम्+ 5000/- रूप्यकाणि च।<br>सर्वेभ्यः उत्तीर्णेभ्यः प्रमाणपत्राणि।<br>**उत्तीर्णतामानदण्डः/ श्रेणीनिर्धारणम् इत्थम्-**<br>• 80% अङ्काः, तदुपरि च विशिष्टश्रेणी+रु. 2000/-<br>• 65% अङ्काः, तदुपरि च प्रथमश्रेणी+रु. 1500/-<br>• 60% तदुपरि च 64% पर्यन्तम् उत्तीर्णताप्रमाणपत्रमात्रम्। |
| **10. व्याकरणशलाकापरीक्षा**<br>**परिभाषेन्दुशेखरः** (आदितः एकदेशविकृतमनन्यवत् इति पर्यन्तम्) | | |
| **11. न्यायशलाकापरीक्षा**<br>**न्यायसिद्धान्तमुक्तावली** (शब्दखण्डमारभ्य समाप्तिं यावत्) | | |
| **12. ज्यौतिषशलाकापरीक्षा**<br>**सिद्धान्तशिरोमणिः** (त्रिप्रश्नाधिकारं यावत्) | | |
| **13. वेदान्तशलाकापरीक्षा**<br>**वेदान्तपरिभाषा** (आगमपरिच्छेदात् आन्ता) | | |
| **14. पुराणेतिहासशलाकापरीक्षा**<br>**महाभारतान्तर्गतं नलोपाख्यानम्** (सम्पूर्णम्) | | |
| **15. मीमांसाशलाकापरीक्षा**<br>**मानमेयोदयः** (प्रमाणनिरूपणभागः) | | |

## III. कण्ठपाठस्पर्धा

| | | |
|---|---|---|
| **16. काव्यकण्ठपाठः**<br>रघुवंशः (5 तः 9 सर्गाः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम्/गुरुकुले अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः - 01-01-2012 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/शास्त्रार्थ-विचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं सर्गस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **17. अमरकोषकण्ठपाठः**<br>(सम्पूर्णः अमरकोषः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम् गुरुकुले वा अधीयानाः छात्राः (गुरुकुले अधीयानानां वयोमितिः 01-01-2013 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/शास्त्रार्थ-विचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अमरकोषस्य प्रत्येकं काण्डस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च। |
| **18. अष्टाध्यायीकण्ठपाठः**<br>(सम्पूर्णा अष्टाध्यायी) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्रिकक्षायां/शास्त्रि-कक्षायां/आचार्यकक्षायां/तत्समकक्षायां गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं प्रति-स्पर्धालुगणम् एकस्यैव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/शास्त्रार्थ-विचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अष्टाध्याय्याः प्रत्येकम् अध्याये विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् सूत्रात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना सूत्राणि श्रावणीयानि। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **19. धातुरूपकण्ठपाठः**<br><br>**सहायकग्रन्थाः-**<br>आचार्य-पुष्पादीक्षितविरचिताः सन्नन्तकोषः, णिजन्तकोषः, यङन्तकोषः नामधातुकोषसहितः (प्रका. संस्कृतभारती, नवदेहली) | • पारम्परिकसंस्कृतशिक्षणसंस्थासु पू.मध्यमा/ उ. मध्यमा/मध्यमा/प्राक्शास्त्री/शास्त्री/आचार्य-तत्समकक्षायाम् गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01- 2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रतिस्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/अन्यकण्ठपाठ-स्पर्धासु शास्त्रार्थविचारे वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकैः पृष्टानां सर्वेषां पाणिनीयधातूनां (सन्नन्तानां, णिजन्तानां, यङन्तानां, च) कर्तरि रूपाणि (विभिन्नलकारेषु) स्पर्धालुना वक्तव्यानि। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च।<br>. |
| **20. शास्त्रार्थविचारः**<br>(भारतीयदर्शनेषु मोक्षस्वरूपविमर्शः) | • संस्कृतविश्वविद्यालयेषु/संस्कृतमहाविद्यालयेषु/ पारम्परिक-शिक्षणसंस्थासु/आदर्शशोधसंस्थासु/ गुरुकुलेषु/अध्यापकगृहे वा अध्ययनरताः/ अनुसन्धानरताः भागग्रहणाय अर्हाः। (वयोमितिः 01-01-2013 तमे दिनाङ्के 30 वर्षाणि अतीतानि न स्युः।)<br>• प्रत्येकं राज्यात् राज्यस्तरे चितौ द्वौ एव छात्रौ अस्यां स्पर्धायां भागं ग्रहीतुमर्हतः।<br>• **अत्र वामतः स्तम्भे निर्दिष्ट-स्थूलविषये स्पर्धार्थिनः सम्यक् अध्ययनं कुर्युः। तदन्तर्गतं स्वाभीष्टशास्त्रांशगतं शीर्षकं निश्चित्य सूक्ष्मतया अनुसन्धानं कुर्युः। स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं च सम्यगवगच्छेयुः। तद्विषये परिचर्चार्थं सिद्धतां कुर्युः।** स्ववक्तव्यस्य शीर्षकं मासात् प्रागेव संयोजकं सूचयेयुः।<br>• शास्त्रार्थस्पर्धा शास्त्रार्थसभावत् आयोजयते यत्र सर्वे स्पर्धिनः वेदिकायां सहैव उपविशेयुः।<br>• प्रत्येकं स्पर्धालुः प्रदत्तविषयाधारेण स्वाभीष्टशास्त्रानुसारं स्वयं निश्चित-शीर्षकानुसारेण 12 निमेषात्मके काले विषयं प्रतिपादयेत्। एकस्य स्पर्धिनः वक्तव्यपरिसमाप्तौ अन्ये स्पर्धिनः निर्णायकानुमतिं प्राप्य प्रश्नान् कुर्युः।<br>• प्रश्नकरणकौशलस्य/चर्चायां भागग्रहणरीतेः अपि पृथक् अङ्काः भवन्ति। सत्यामावश्यकतायाम् निर्णायकाः अपि प्रश्नान् पृच्छेयुः। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च। |
| **IV. समस्यापूर्तिः अन्त्याक्षरी च** | | |
| **21. समस्यापूर्तिः** | • समस्यापूर्तौ, अक्षरश्लोकीस्पर्धायां च तदर्थमेव चितौ द्वौ (समस्यापूर्तौ एकः, अक्षरश्लोक्यामेकः) ; तावुभौ अतिरिच्य प्रत्येकं राज्यात् आगतस्पर्धालुगणस्य अन्ये सर्वे सदस्याः अपि भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धायां/अष्टाध्यायी-कण्ठपाठे/काव्यकण्ठपाठे/अमरकोषकण्ठपाठे धातुरूपकण्ठ-पाठे/शास्त्रार्थविचारे वा ये भागं गृह्णन्ति ते अपि समस्यापूर्तौ अक्षरश्लोक्यां च भागं ग्रहीतुमर्हन्ति। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| 22. अक्षरश्लोकी | • समस्यापूर्तिनिमित्तं समस्यात्रयम् स्पर्धास्थाने उद्घोष्यते। अर्धघण्टा-काले प्रत्येकं स्पर्धार्थिना समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br>• अस्यां स्पर्धायाम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः– 1. स्वप्नवासवदत्तम्, 2. रघुवंशम्, 3. कुमारसम्भवम्, 4. बुद्धचरितम् (अश्वघोषस्य) 5. सौन्दरानन्दम् (अश्वघोषस्य) 6. किरातार्जुनीयम्, 7. अभिज्ञानशाकुन्तलम्, 8. विक्रमोर्वशीयम्, 9. मालविकाग्निमित्रम्, 10. मेघदूतम्, 11. नैषधीयम्, 12. उत्तररामचरितम्, 13. शिशुपालवधम्, 14. मृच्छकटिकम्, 15. मुद्राराक्षसम्। 16. भर्तृहरेः सुभाषितत्रिशती, 17. गङ्गाधरशास्त्रिप्रणीतः अलिविलासिसंलापः,✶ 18. श्रीशङ्करभगवत्पादविरचिता सौन्दर्यलहरी, 19. शिवमहिम्नस्तोत्रम्, 20. महिषासुरमर्दिनीस्तोत्रम्, 21. पण्डितराजजगन्नाथस्य पञ्च लहर्यः –गङ्गालहरी (पीयूषलहरी), अमृतलहरी, करुणालहरी (विष्णुलहरी), लक्ष्मीलहरी, सुधालहरी, 22. पण्डितराज-जगन्नाथविरचित-भामिनीविलासः, 23. शिवशतकम्✶ 24. रमाकान्तशुक्ल- विरचितं 'भाति मे भारतम्',-एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते।<br>• पूर्ववर्तिना स्पर्धालुना पठितस्य श्लोकस्य **तृतीयपादगतं प्रथमाक्षरं** गृहीत्वा स्वस्वपर्याये स्पर्धालुः श्लोकं पठेत्। यथा- 'कश्चित् कान्ता.......' इति मेघदूतश्लोके पठिते सति क्रमागतपर्यायः स्पर्धी यकारेणारभ्यमाणं श्लोकं पठेत्।<br>• स्पर्धां परिसमापयितुम् उपलब्धसमयं, स्पर्धायाः गतिं च वीक्ष्य स्पर्धारम्भानन्तरं क्रमेण नियमाः निर्णायकैः परिशोधयिष्यन्ते। | I. स्वर्णपदकम् + 10000/- रूप्यकाणि च।<br>II. रजतपदकम् + 7000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 5000/- रूप्यकाणि च।<br>✶ अलिविलासिसंलापः शिवशतकं चेति ग्रन्थौ रा.सं.संस्थानेन प्रकाशितौ। |

**विजयवैजयन्ती**

विभिन्नस्पर्धासु स्पर्धालूनां पुरस्कारोपलब्धेः आधारेण अत्यधिकाङ्कभाजे स्पर्धालुगणाय विजयवैजयन्ती प्रदास्यते।

- उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायां निर्णयकाले प्रथम-द्वितीय-तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोः/तेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्येत।
- आहत्य प्रतिराज्यं/प्रति-स्पर्धालुगणं त्रयोविंशतिः स्पर्धालवः (भाषणेषु प्रतिविषयम् एकैकः इति 8, शलाकासु प्रतिविषयम् एकैकः इति 7, काव्यकण्ठपाठ-अष्टाध्यायी-अमरकोषकण्ठपाठ-धातुरूपकण्ठपाठ-समस्यापूर्ति-अन्त्याक्षरी-स्पर्धासु एकैकः शास्त्रार्थविचारे द्वौ चेत्याहत्य 23) अखिलभारतीयायां शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।

## अखिलभारतीय (राष्ट्रस्तरीय)-स्पर्धासु भागग्रहणाय प्रक्रिया

- **राज्यस्तरीयस्पर्धासु चिताः, उपरितनसूच्यां दर्शितरीत्या अर्हतावन्तः** अखिलभारतीयायां (राष्ट्रस्तरीयायां) स्पर्धायां भागं ग्रहीष्यन्ति। अर्थात् राज्यस्तरीयस्पर्धायोजनसमित्या राष्ट्रस्तरीयस्पर्धानिमित्तं चितः अर्हस्पर्धिगणः एव राष्ट्रस्तरीय (अखिलभारतस्तरीय)-स्पर्धायाम् उपस्थितः भवेत्। तद्विहाय काचिदपि संस्था / किमपि गुरुकुलम् साक्षादेव स्वीयं छात्रम् अखिलभारतीय-स्पर्धां प्रति प्रेषयितुम् न अर्हति। अतः उपरि निर्दिष्टासु स्पर्धासु **भागग्रहणचिकीर्षवः/स्पर्धार्थिनः आदौ राज्यस्तरीयस्पर्धार्थं स्वस्वसंस्थामाध्यमेन स्वगुरुकुलमाध्यमेन/गुरोः माध्यमेन वा निर्दिष्टप्रपत्रं प्रपूर्य राज्यस्तरीयस्पर्धायोजकसंस्थायै सम्प्रेष्य नामाङ्कनं कुर्युः।**
- राज्यस्तरीय-शास्त्रीयस्पर्धायाः नियमावलिः, राज्यस्तरीयस्पर्धा कस्य राज्यस्य कुत्र भविष्यति? तदायोजकाः के? राज्यस्तरीयस्पर्धायै नामाङ्कनाय प्रपत्रम् इत्यादि विवरणम् अग्रिमेषु पृष्ठेषु (पृ.सं. 8 तः 23 ) अवलोकनीयम्।

◆◆◆

## राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# शलाकापरीक्षा-विधानम्

**स्पर्धालोः ( अध्येतुः ) कर्तव्यम्–**

शलाकास्पर्धायां भागग्रहणचिकीर्षुणा स्पर्धालुना निर्दिष्टशास्त्रस्य निर्दिष्ट-ग्रन्थभागस्य समग्रतया (न तु अंशतः) अध्ययनं कार्यम्। स्पर्धालुः (अध्येता) ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात्, ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुमपि कौशलं सम्पादयेत्। एतदभ्यन्तरे, एतस्याः पुस्तिकायाः पृष्ठसंख्या – 13 इत्यत्र सूचितरीया राज्यस्तरीयस्पर्धार्थं नामाङ्कनमपि समये कारणीयम् इति न विस्मरेत्।

**परीक्षाविधानम्–**

अखिलभारतीयायां, राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिधा क्रियते–

I. स्मृतिबल/धारणाशक्ति-परीक्षणम्

II. ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्

III. विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/गाढपरीक्षणम्

**I. प्रथमः घट्टः** ( स्मृतिबल/धारणाशक्ति-परीक्षणम्)

- परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः (परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तम्)
- परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। [स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति।]
- प्रतिवारमपि परीक्षकैः शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।

**II. द्वितीयः घट्टः** ( व्याख्यानसामर्थ्यपरीक्षणम्)

- परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।

**III. तृतीयः घट्टः** ( विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्)

- परीक्षकाः शलाकया उद्धृते स्थाने विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य उपप्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। एकवारं कृत-प्रश्नोपप्रश्न-शास्त्रचर्चादीनां समाधानात् परं पुनः शलाकया ग्रन्थमुद्घाट्य द्वितीयवारम् एवमेव प्रश्नोपप्रश्नचर्चादिकं भवेत्। अनया रीत्या तृतीयवारं, चतुर्थवारं/पञ्चमवारं च परीक्षकाः प्रश्नान् कुर्युः।

त्रिष्वपि घट्टेषु स्पर्धालुना स्वीयं समार्थ्यं प्रदर्शनीयम्। अन्यथा भागग्रहणम् अपूर्णं भवेत्। परीक्षायाम् उत्तीर्णानाम् एव पुरस्काराय प्रथम/द्वितीय/तृतीय-स्थाननिश्चयः क्रियते।

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# राज्यस्तरीया शास्त्रीया स्पर्धा

## नवम्बर्/ दिसम्बर् २०१३

# नियमावलिः

## I. भाषणस्पर्धा

<table>
<tr><th>क्र.सं स्पर्धायाः नाम<br>स्पर्धार्थिना अध्येतव्यः ग्रन्थश्च</th><th>भागग्रहणाय अर्हता/स्पर्धाविवरणम्</th><th>पुरस्कारः</th></tr>
<tr><td>1. व्याकरणभाषणम्<br>परिभाषेन्दुशेखरः (असिद्धं बहिरङ्गम् इति परिभाषान्तमः)</td><td rowspan="8">• संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु आचार्यकक्षायां/तत्समकक्षायाम् (पारम्परिकपद्धतौ) अथवा शास्त्रिकक्षायाः तृतीयवर्षे/तत्समकक्षायाः अन्तिमवर्षे कस्मिंश्चिदपि शास्त्रे (पारम्परिकपद्धतौ) अधीयानाः छात्राः भागग्रहणाय अर्हाः।<br>• प्रतिमहाविद्यालयं/प्रतिसंस्थं/प्रति-स्पर्धालुगणं प्रत्येकं विषये (शास्त्रे) भाषण-स्पर्धायाम् एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति।<br>• एकः स्पर्धालुः भाषणेषु एकस्मिन् विषये एव भागं ग्रहीतुमर्हति अर्थात् एकः स्पर्धालुः शास्त्रद्वये भाषणस्पर्धायां भागग्रहणाय नानुमन्यते।<br>• भाषणार्थं निर्दिष्टं (वामतः स्तम्भे निर्दिष्टं) तत्तच्छास्त्रसम्बद्धं ग्रन्थं सम्यगधीत्य स्पर्धालुः उपस्थितः भवेत्। स्पर्धारम्भात् एकघण्टापूर्वम् तेभ्यः ग्रन्थेभ्यः प्रतिशास्त्रं कश्चन विषय-विशेषः भाषणीय-विषयस्य शीर्षकत्वेन उद्घोष्यते।<br>• भाषणाय षट्-निमेषात्मकः (5+1) कालः दीयते। [पञ्चनिमेषाणामन्ते सूचना दीयते। तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम्।]<br>• भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः।</td><td rowspan="8">• प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते।</td></tr>
<tr><td>2. साहित्यभाषणम्<br>काव्यप्रकाशः (1 तः 3 उल्लासाः)★</td></tr>
<tr><td>3. न्यायभाषणम्<br>न्याससिद्धान्तमुक्तावली (शब्दखण्डमारभ्य आन्ता)</td></tr>
<tr><td>4. साङ्ख्य-योगभाषणम्<br>योगसूत्र-व्यासभाष्यम् (प्रथमपादः)</td></tr>
<tr><td>5. मीमांसाभाषणम्<br>जैमिनीयन्यायमाला (प्रथम-द्वितीयाध्यायौ)</td></tr>
<tr><td>6. वेदान्तभाषणम्<br>वेदान्तपरिभाषा (आगमपरिच्छेदात् आन्तम्)</td></tr>
<tr><td>7. धर्मशास्त्रभाषणम्<br>मनुस्मृतिः (नवमाध्यायः कुल्लूकभट्टव्याख्यासहितः)</td></tr>
<tr><td>8. ज्यौतिषभाषणम्<br>मुहूर्तचिन्तामणिः (सम्पूर्णः)</td></tr>
</table>

★ अवधेयम्- रा.सं.संस्थानस्य जालपुटे (website) १.४.२०१३ तमे दिनाङ्के निवेशित-नियमावल्याः नवमे/दशमे पृष्ठे राज्यस्तरीयस्पर्धासूच्यां साहित्यभाषणम् इत्यस्य अधः 'रसगङ्गाधरः (प्रथमाननम्)' इति अनवधानात् मुद्रितम् आसीत्। तस्मिन् स्थाने अस्मिन् पत्रे उपरि निर्दिष्टरीत्या 'काव्यप्रकाशः (१ तः ३ उल्लासाः)' इति परिष्कृत्य पठेयुरिति निवेदनम्। मुद्रितनियमावल्यां परिष्कृतनियमाः एव निर्दिष्टाः।

अनुवर्तते....

## II. शलाकापरीक्षा

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **9. साहित्यशास्त्रशलाकापरीक्षा** **ध्वन्यालोकः** (प्रथमद्वितीयोद्योतौ सम्पूर्णौ)<br>**10. व्याकरणशलाकापरीक्षा** **परिभाषेन्दुशेखरः** (आदितः एकदेशविकृतमनन्यवत् इति पर्यन्तम्)<br>**11. न्यायशलाकापरीक्षा** **न्यायसिद्धान्तमुक्तावली** (शब्दखण्डमारभ्य समाप्तिं यावत्)<br>**12. ज्यौतिषशलाकापरीक्षा** **सिद्धान्तशिरोमणिः** (त्रिप्रश्नाधिकारं यावत्)<br>**13. वेदान्तशलाकापरीक्षा** **वेदान्तपरिभाषा** (आगमपरिच्छेदात् आन्ता)<br>**14. पुराणेतिहासशलाकापरीक्षा** **महाभारतान्तर्गतं नलोपाख्यानम्** (सम्पूर्णम्)<br>**15. मीमांसाशलाकापरीक्षा** **मानमेयोदयः** (प्रमाणनिरूपणभागः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां/गुरुकुले वा अधीयानाः/कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाः वा छात्राः। (गुरुकुले अधीयानानां/विद्वत्सन्निधौ स्वाध्यायरतानां निर्दिष्टग्रन्थं सम्यक् अधीतवतां छात्राणां समकक्षता-निर्बन्धो नास्ति। किन्तु तादृशानां वयोमितिः - 01-01-2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रत्येकं शास्त्रे शलाकापरीक्षायाम् एकस्मात् महाविद्यालयात्/गुरुकुलात् (प्रतिस्पर्धा-लुगणम्) एकस्यैव अवसरः।<br>• एकस्य छात्रस्य एकस्मिन् शास्त्रे एव शलाकास्पर्धायाम् अवसरः कल्प्यते।<br>• भाषणस्पर्धायां कण्ठपाठस्पर्धायां वा यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br>• **शलाकापरीक्षाविधानविषये विवरणं अस्याः पुस्तिकायाः पृ.सं-8 इत्यत्र अवलोकनीयम्।** | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

## III. कण्ठपाठस्पर्धा

| | | |
|---|---|---|
| **16. काव्यकण्ठपाठः** रघुवंशः (5 तः 9 सर्गाः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम्/गुरुकुले अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः - 01-01-2013 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिसंस्थं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/अन्य-कण्ठपाठस्पर्धासु/शास्त्रार्थविचारे वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं सर्गस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **17. अमरकोषकण्ठपाठः**<br>(सम्पूर्णः अमरकोषः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम् गुरुकुले वा अधीयानाः छात्राः (गुरुकुले अधीयानानां वयोमितिः 01-01-2013 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिसंस्थं/प्रति-स्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु/शास्त्रार्थविचारे वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अमरकोषस्य प्रत्येकं काण्डस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |
| **18. अष्टाध्यायीकण्ठपाठः**<br>(सम्पूर्णा अष्टाध्यायी) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्रिकक्षायां/शास्त्रि-कक्षायां/आचार्यकक्षायां/तत्समकक्षायां गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिसंस्थं प्रति-स्पर्धालुगणम् एकस्यैव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु/शास्त्रार्थविचारे वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अष्टाध्याय्याः प्रत्येकम् अध्याये विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् सूत्रात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना सूत्राणि श्रावणीयानि। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| **19. धातुरूपकण्ठपाठः**<br><br>**सहायकग्रन्थाः-**<br>आचार्य-पुष्पादीक्षितविरचिताः सन्नन्तकोषः, णिजन्तकोषः, यङन्तकोषः नामधातुकोषसहितः (प्रका. संस्कृतभारती, नवदेहली) | • पारम्परिकसंस्कृतशिक्षणसंस्थासु पू.मध्यमा/ उ. मध्यमा/मध्यमा/प्राक्शास्त्री/शास्त्री/आचार्य-तत्समकक्षायाम् गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01- 2013 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रतिस्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/अन्यकण्ठपाठ-स्पर्धासु शास्त्रार्थविचारे वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकैः पृष्टानां सर्वेषां पाणिनीयधातूनां (सन्नन्तानां, णिजन्तानां, यङन्तानां, च) कर्तरि रूपाणि (विभिन्नलकारेषु) स्पर्धालुना वक्तव्यानि। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |
| **20. शास्त्रार्थविचारः**<br>(भारतीयदर्शनेषु मोक्षस्वरूपविमर्शः) | • संस्कृतविश्वविद्यालयेषु/संस्कृतमहाविद्यालयेषु/ पारम्परिक-शिक्षणसंस्थासु/आदर्शशोधसंस्थासु/ गुरुकुलेषु/अध्यापकगृहे वा अध्ययनरताः/ अनुसन्धानरताः भागग्रहणाय अर्हाः। (वयोमितिः 01-01-2013 तमे दिनाङ्के 30 वर्षाणि अतीतानि न स्युः।)<br>• प्रत्येकं राज्यात् राज्यस्तरे चितौ द्वौ एव छात्रौ अस्यां स्पर्धायां भागं ग्रहीतुमर्हतः।<br>• **अत्र वामतः स्तम्भे निर्दिष्ट-स्थूलविषये स्पर्धार्थिनः सम्यक् अध्ययनं कुर्युः। तदन्तर्गतं स्वाभीष्टशास्त्रांशगतं शीर्षकं निश्चित्य सूक्ष्मतया अनुसन्धानं कुर्युः। स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं च सम्यगवगच्छेयुः। तद्विषये परिचर्चार्थं सिद्धतां कुर्युः।** स्ववक्तव्यस्य शीर्षकं मासात् प्रागेव संयोजकं सूचयेयुः।<br>• शास्त्रार्थस्पर्धा शास्त्रार्थसभावत् आयोजयते यत्र सर्वे स्पर्धिनः वेदिकायां सहैव उपविशेयुः।<br>• प्रत्येकं स्पर्धालुः प्रदत्तविषयाधारेण स्वाभीष्टशास्त्रानुसारं स्वयं निश्चित-शीर्षकानुसारेण 12 निमेषात्मके काले विषयं प्रतिपादयेत्। एकस्य स्पर्धिनः वक्तव्यपरिसमाप्तौ अन्ये स्पर्धिनः निर्णायकानुमतिं प्राप्य प्रश्नान् कुर्युः।<br>• प्रश्नकरणकौशलस्य/चर्चायां भागग्रहणरीतेः अपि पृथक् अङ्काः भवन्ति। सत्यामावश्यकतायाम् निर्णायकाः अपि प्रश्नान् पृच्छेयुः। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |
| **IV. समस्यापूर्तिः अन्त्याक्षरी च** | | |
| **21. समस्यापूर्तिः** | • समस्यापूर्तौ, अक्षरश्लोकीस्पर्धायां च तदर्थमेव चितौ द्वौ (समस्यापूर्तौ एकः, अक्षरश्लोक्यामेकः) ; तावुभौ अतिरिच्य प्रत्येकं राज्यात् आगतस्पर्धालुगणस्य अन्ये सर्वे सदस्याः अपि भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धायां/अष्टाध्यायी-कण्ठपाठे/काव्यकण्ठपाठे/अमरकोषकण्ठपाठे धातुरूपकण्ठ-पाठे/शास्त्रार्थविचारे वा ये भागं गृह्णन्ति ते अपि समस्यापूर्तौ अक्षरश्लोक्यां च भागं ग्रहीतुमर्हन्ति। | |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|
| 22. अक्षरश्लोकी | • समस्यापूर्तिनिमित्तं समस्यात्रयम् स्पर्धास्थाने उद्घोष्यते। अर्धघण्टा-काले प्रत्येकं स्पर्धार्थिना समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br>• अस्यां स्पर्धायाम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः– 1. स्वप्नवासवदत्तम्, 2. रघुवंशम्, 3. कुमारसम्भवम्, 4. बुद्धचरितम् (अश्वघोषस्य) 5. सौन्दरानन्दम् (अश्वघोषस्य) 6. किरातार्जुनीयम्, 7. अभिज्ञानशाकुन्तलम्, 8. विक्रमोर्वशीयम्, 9. मालविकाग्निमित्रम्, 10. मेघदूतम्, 11. नैषधीयम्, 12. उत्तररामचरितम्, 13. शिशुपालवधम्, 14. मृच्छकटिकम्, 15. मुद्राराक्षसम्। 16. भर्तृहरेः सुभाषितत्रिशती, 17. गङ्गाधरशास्त्रिप्रणीतः अलिविलासिसंलापः,✶ 18. श्रीशङ्करभगवत्पादविरचिता सौन्दर्यलहरी, 19. शिवमहिम्नस्तोत्रम्, 20. महिषासुरमर्दिनीस्तोत्रम्, 21. पण्डितराजजगन्नाथस्य पञ्च लहर्यः –गङ्गालहरी (पीयूषलहरी), अमृतलहरी, करुणालहरी (विष्णुलहरी), लक्ष्मीलहरी, सुधालहरी, 22. पण्डितराज-जगन्नाथविरचित-भामिनीविलासः, 23. शिवशतकम्✶ 24. रमाकान्तशुक्ल- विरचितं 'भाति मे भारतम्',-एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते।<br>• पूर्ववर्तिना स्पर्धालुना पठितस्य श्लोकस्य **तृतीयपादगतं प्रथमाक्षरं** गृहीत्वा स्वस्वपर्याये स्पर्धालुः श्लोकं पठेत्। यथा- 'कश्चित् कान्ता.......' इति मेघदूतश्लोके पठिते सति क्रमागतपर्यायः स्पर्धी यकारेणारभ्यमाणं श्लोकं पठेत्।<br>• स्पर्धां परिसमापयितुम् उपलब्धसमयं, स्पर्धायाः गतिं च वीक्ष्य स्पर्धारम्भानन्तरं क्रमेण नियमाः निर्णायकैः परिशोधयिष्यन्ते। | • प्रथमस्थानभाजे राष्ट्रस्तरीय-स्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथम-द्वितीय-तृतीय-स्थान-भाजां कृते प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तु-रूपेण/ग्रन्थरूपेण/धनराशि-रूपेण वा पुरस्काराः राज्य-स्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते।<br><br>✶ अलिविलासिसंलापः शिवशतकं चेति ग्रन्थौ रा.सं.संस्थानेन प्रकाशितौ। |

* उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायां निर्णयकाले प्रथम-द्वितीय-तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोः/तेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्येत।

* **आहत्य** प्रत्येकं संस्थायाः/प्रत्येकं गुरुकुलस्य (प्रति-स्पर्धालुगणं) **त्रयोविंशतिः स्पर्धालवः** (भाषणेषु प्रतिविषयम् एकैकः इति 8, शलाकासु प्रतिविषयम् एकैकः इति प्रकारेण-7, काव्यकण्ठपाठ-अष्टाध्यायी कण्ठपाठ-अमरकोषकण्ठपाठ-धातुरूपकण्ठपाठ-समस्यापूर्ति-अन्त्याक्षरी-स्पर्धासु एकैकः, शास्त्रार्थविचारे द्वौ चेत्याहत्य 23) राज्यस्तरीयायां शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।

* राज्यस्तरीयस्पर्धासु चिताः, **अखिलभारतीय(राष्ट्रस्तरीय)-शास्त्रीयस्पर्धायाः नियमावल्यां (पृ.सं. 3 तः 8) दर्शितरीत्या अर्हतावन्तः एव** अखिलभारतीयायां (राष्ट्रस्तरीयायां) स्पर्धायां भागं ग्रहीष्यन्ति।

## राज्यस्तरीय-स्पर्धासु भागग्रहणाय नामाङ्कनार्थं प्रक्रिया

➢ उपरि निर्दिष्टासु राज्यस्तरीय-स्पर्धासु भागग्रहणचिकीर्षवः/स्पर्धार्थिनः तदर्थं स्वस्वसंस्थामाध्यमेन स्वगुरु-कुलमाध्यमेन स्वगुरोः माध्यमेन वा निर्दिष्टप्रपत्रं प्रपूर्य राज्यस्तरीयस्पर्धायोजकसंस्थायै सम्प्रेष्य नामाङ्कनं कुर्युः।

➢ राज्यस्तरीयस्पर्धा कस्य राज्यस्य कुत्र भविष्यति? तदायोजकाः के? राज्यस्तरीयस्पर्धायै नामाङ्कनाय निर्दिष्टं प्रपत्रम् इत्यादि विवरणम् अग्रिमेषु पृष्ठेषु (पृ.सं. 14 तः 23) अवलोकनीयम्।

◆◆◆

## राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# राज्यस्तरीय-शास्त्रीयस्पर्धायोजनस्थानानि/आयोजकसंस्थाः

| क्र.सं | राज्यम् | राज्यस्तरीयस्पर्धायोजनस्थानम्/आयोजकसंस्था |
|---|---|---|
| 1. | जम्मू-काश्मीरम् | राष्ट्रियसंस्कृतसंस्थानम्, रणवीरपरिसरः, जम्मू<br>कोट-भलवाल, जम्मू-181122<br>☎ : 0191-2623090, E-mail-ranbirjmu@gmail.com |
| 2. | हिमाचलप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहर,<br>पोस्ट् बेग संख्या-1, देहरा, काँगड़ा-177101<br>☎ : 01970-245409, E-mail-principal.garli@gmail.com |
| 3. | देहली | श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठम्,<br>बी-4, कुतुब-सास्थानिक-क्षेत्रम्, कटवारिया सराय, नवदेहली 110016<br>011-46060606, फैक्स्- 26533512, 26520255<br>Email- info@slbsrsv.ac.in |
| 4. | हरियाणा | श्री दीवान-कृष्ण-किशोर-एस्. डी.<br>आदर्श-संस्कृतमहाविद्यालयः, अम्बाला कैण्ट्-133001, हरियाणा<br>☎: 0171-2634283, Mob- 9896356235<br>Email- sdsanskritcollegeambala.webnod.com |
| 5. | पञ्जाबः | |
| 6. | उत्तराखण्डः | भगवानदास-आ. संस्कृतमहाविद्यालयः,<br>गुरुकुल-काङ्गडी, हरिद्वारम् उत्तराखण्डः, ☎ 01334-226827<br>Email- bhola_jha55@rediffmail.com |
| 7. | उत्कलम् | राष्ट्रियसंस्कृतसंस्थानम्, सदाशिवपरिसरः<br>पुरी-752001,<br>☎ : 06752-223439, E-mail- principalpuri2009@gmail.com |
| 8. | बिहारम् | श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्,<br>लक्ष्मीनाथनगरम्, रामौली बेलोना, द्वारा-बहेडा, दरभङ्गा 847201<br>बिहारम् 09771267138 Email- shabda.priyavrata@gmail.com |
| 9. | झारखण्डः | |
| 10. | पश्चिमवङ्गः | श्री सीताराम-वैदिक-आदर्श-संस्कृतमहाविद्यालयः,<br>7/2 पी.डब्ल्यू.डी. रोड्, कोलकाता-700035 पश्चिम-बंगाल,<br>☎ 033-25777250, 25100850, Mob- 09883258920<br>E-mail- ssvasm@gmail.com |
| 11. | पूर्वोत्तरम् | राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसरः,<br>C/o स्वामि-विवेकानन्दमहाविद्यालयः, मोहनपुरम्, हरिनखला,<br>कमलघाट, पश्चिम-त्रिपुरा 799210<br>0381-2907850 फैक्स्- 2907859 |

अनुवर्तते....

| क्र.सं | राज्यम् | राज्यस्तरीयस्पर्धायोजनस्थानम्/आयोजकसंस्था |
|---|---|---|
| 12. | राजस्थानम् | राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, त्रिवेणी-नगरम्, गोपालपुर-बाईपास, जयपुरम्-302018, ☎ : 0141-2760686, 2761115, 2761236 E-mail-principaljp.in@gmail.com |
| 13. | उत्तरप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः, विशाल-खण्डः 4, गोमती-नगरम्, लखनऊ-226010 ☎ : 0522-2393748, E-mail-rskslucknow@yahoo.com |
| 14. | मध्यप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, संस्कृतमार्गः भागसेवनिया, भोपाल-462043 ☎ : 0755-2418043, E-mail-rsks_bhopal@yahoo.com |
| 15. | छत्तीसगढम् | |
| 16. | गुजरात् | 'दर्शनम्' संस्कृतमहाविद्यलायः, श्री स्वामिनारायण-गुरुकुल-विश्वविद्याप्रतिष्ठानम्, एस्.जी.वी.पी. वृत्तम्, एस्.जि-राजमार्गः, छारोडी, अहमदाबाद्-382481 ☎ 02717-242141 तः 3 फेक्स्-242083, E-mail-dsm@yahoo.in |
| 17. | महाराष्ट्रम् | राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैया-संस्कृतविद्यापीठपरिसरः, एस्.आई.एम्.एस्.आर्. भवनम्, विद्याविहारः, मुम्बई-400077 ☎ : 022-25125452, E-mail-rsksmumbai@yahoo.com |
| 18. | गोवा | |
| 19. | आन्ध्रप्रदेशः | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति, आ. प्र 517507 0877-2287649,2286600 Email- registrar_rsvp@yahoo.co.in |
| 20. | तमिलनाडु | मद्रपुरीसंस्कृतमहाविद्यालयः (मद्रास-संस्कृत-कालेज एवं एस्.एस्.वी-पाठशाला) 84, रोय् पेट, हाई-रोड्, मैलापुरम्, चेन्नै - 600004, ☎ 044-24980429, 24338497 Email- mds.sanskritcollege@gmail.com |
| 21. | पाण्डिचेरी | |
| 22. | केरलम् | राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूरपरिसरः, पो०पुरनाटुक्करा, त्रिचूर-680551 ☎ 0487-2307608, E-mail-rss.guruvayoor@gmail.com |
| 23. | कर्णाटकम् (कर्णाटकराज्यशासनानुदानेन तत्रत्यः संस्कृतशिक्षणनिदेशालयः रा.स्तरीयस्पर्धामायोजयति) | संस्कृतशिक्षणनिदेशालयः कर्णाटसंस्कृतविश्वविद्यालयाधीनः, श्रीचामराजेन्द्र-संस्कृतमहाविद्यालयपरिसरः पम्पमहाकविमार्गः, चामराज-पेटे बेङ्गलूरु-560018 ☎ 080-26705596, 26701303 Email- karnatakasanskrituniversity@gmail.com |

सूचना- या आयोजकसंस्था द्वयोः राज्ययोः स्पर्धिनां कृते राज्यस्तरीयस्पर्धाम् आयोजयति सा प्रत्येकं राज्यस्य पृथक्-पृथक् अर्हस्पर्धिगणं राष्ट्रस्तरीयस्पर्धायै निश्चिनुयात् (न तु साकल्येन)।

## अवधेयांशा:

- पारम्परिकसंस्कृतशिक्षणसंस्था: (संस्कृतविश्वविद्यालया:/संस्कृतमहाविद्यालया:), गुरुकुलानि/संस्कृत-शोधसंस्थानानि, स्वगृहे शिष्यान् बोधयन्त: पारम्परिका: संस्कृताध्यापका: च स्वस्वसंस्थापक्षत: राज्यस्तरीय-शास्त्रीयस्पर्धायै अर्हस्पर्धिगणं निश्चित्य प्रपूरितनामाङ्कनप्रपत्रं 30-9-2013 दिनाङ्कं यावत् तत्तद्राज्यस्तरीयस्पर्धायोजकसंस्थां प्रति प्रेषयेयु:।
- भाषण-शलाकापरीक्षादिषु सर्वासु शास्त्रीयस्पर्धासु भागग्रहणाय सतत-गभीरपरिश्रमस्य आवश्यकता भवति। अत: छात्राणां कृते अपेक्षितं मार्गदर्शनं विधाय स्पर्धानां गुणवत्तास्तरवर्धनाय छात्रान् सम्प्रेरयेयु:/प्रोत्साहयेयु: इति तत्तत्संस्थाया: आचार्येषु निवेदनम्।
- राज्यस्तरीयशास्त्रीयस्पर्धा: 2013-नवम्बरमासस्य उत्तरार्धे/दिसम्बरमासे वा यदा कदापि भवितुमर्हन्ति। राज्यस्तरीयस्पर्धायोजनदिनाङ्कविषये इदमित्थमिति सूचना सम्बद्धसंस्थाभ्य: (याभि: संस्थाभि: राज्यस्तरीयस्पर्धायै स्वीयच्छात्राणां नामाङ्कनं कारितं ताभ्य: संस्थाभ्य:) पत्रद्वारा 30 अक्टोबर - 2013 दिनाङ्कं यावत् राज्यस्तरीयस्पर्धायोजक-संस्थाभि: प्रेषयिष्यते।
- राज्यस्तरीयस्पर्धासु चितानां राष्ट्रस्तरीय (अखिलभारतस्तरीय)-स्पर्धायै अर्हाणां सूचीं राज्यस्तरीयस्पर्धा-योजकसंस्था: राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयं प्रति 31 दिसम्बर 2013 दिनाङ्कं यावत् प्रेषयेयु:।

---

### प्रमुखा: तिथय:-

| | |
|---|---|
| ☛ संस्थानस्य विश्वव्यापिजालपुटे www.sanskrit.nic.in शलाकापरीक्षा-कण्ठपाठादीनां विषयघोषणा | – 01-04-2013 |
| ☛ राज्यस्तरीयस्पर्धार्थं नामाङ्कनाय काल: | – 10 अगस्त 2013 त: 30 सप्तम्बर 2013 पर्यन्तम् |
| ☛ राज्यस्तरीयस्पर्धाया: आयोजनम् विविधराज्येषु | – प्राय: 2013 नवम्बरमासस्य उत्तरार्धे/दिसम्बरमासे |
| ☛ अखिलभारतीयशास्त्रीयस्पर्धाया: आयोजनम् | – प्राय: 2014 जनवरी/फेब्रवरीमासे |

---

### सम्पर्कसूत्रम्

राज्यस्तरीयस्पर्धायोजनविषये जिज्ञासितं ज्ञातुं तत्तद्राज्यस्तरीयस्पर्धायोजकसंस्थानां/संस्थानपरिसराणां प्राचार्याणां सम्पर्क: कर्तुं शक्यते। (तेषां दूरवाणीसंख्यासहितसङ्केतसूची एतस्या: पुस्तिकाया: 14-15 पृष्ठयो: विद्यते।) तदतिरिच्य, अखिलभारतीयशास्त्रीयस्पर्धासम्बन्धिविवरणं प्राप्तुं सङ्केत: -

**कू.वेङ्कटेशमूर्ति:** (सहायकाचार्य:, मु.स्वा.पी.)
संयोजक:, अखिलभारतीयशास्त्रीयस्पर्धा
☎ 011-28524993, 28520979 फेक्स्- 28520976, 28524387, 09868256044,
E-mail : kuvemoorthy@gmail.com

**प्रपत्रसङ्ख्या-1**

## राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## राज्यस्तरीय-शास्त्रीयस्पर्धाः ( नवम्बर्/दिसम्बर - 2013 )

# राज्यस्तरीय-शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हाणां नामाङ्कनाय प्रपत्रम्

**[राज्यस्तरीय-शास्त्रीयस्पर्धायाः नियमावलिं परिशील्य स्वसंस्थायाः पक्षतः एतत् प्रपत्रं प्रपूर्य प्रेषणीयम्।]**

**सूचना** - एतस्मिन् पञ्जीकरणपत्रे स्पष्टतया **देवनागर्या एव** नामानि लेखनीयानि। एतदनुसृत्यैव प्रमाणपत्रेषु नामानि लिखितानि भवेयुः।

**संस्थायाः/गुरुकुलस्य/गुरोः नाम** - ........................................................................................................

**संस्थायाः स्वरूपम्** - संस्कृतविश्वविद्यालयः/महाविद्यालयः/गुरुकुलम्/अध्यापकगृहम्/आ.शोधसंस्था (यदुचितं तत् चिह्नीकुर्वन्तु)

**सङ्केतः** - ........................................................................................................

**राज्यम्** - ........................................................................................................

| **क्र.सं.** | **राज्यस्तरीय-स्पर्धायाः नाम** यत्र भागग्रहणमिच्छति | **स्पर्धार्थिनः नाम देवनागर्या** | **कक्षा** | **वयः** ( 1-1-2013 दिनाङ्के यथा ) | **अधीयमानं शास्त्रम्** |
|---|---|---|---|---|---|
| 1. | व्याकरणभाषणम् | | | | |
| 2. | साहित्यभाषणम् | | | | |
| 3. | न्यायभाषणम् | | | | |
| 4. | साङ्ख्य-योगभाषणम् | | | | |
| 5. | मीमांसाभाषणम् | | | | |
| 6. | वेदान्तभाषणम् | | | | |
| 7. | धर्मशास्त्रभाषणम् | | | | |
| 8. | ज्यौतिषभाषणम् | | | | |
| 9. | साहित्यशलाकापरीक्षा | | | | |

अनुवर्तते....

| क्र.सं. | राज्यस्तरीय-स्पर्धाया: नाम यत्र भागग्रहणमिच्छति | स्पर्धार्थिन: नाम देवनागर्या | कक्षा | वय: ( 1-1-2013 दिनाङ्के यथा ) | अधीयमानं शास्त्रम् |
|---|---|---|---|---|---|
| 10. | व्याकरणशलाकापरीक्षा | | | | |
| 11. | न्यायशलाकापरीक्षा | | | | |
| 12. | सिद्धान्तज्योतिष-शलाकापरीक्षा | | | | |
| 13. | वेदान्तशलाकापरीक्षा | | | | |
| 14. | पुराणेतिहास-शलाकापरीक्षा | | | | |
| 15. | मीमांसाशलाकापरीक्षा | | | | |
| 16. | काव्यकण्ठपाठ: | | | | |
| 17. | अमरकोषकण्ठपाठ: | | | | |
| 18. | अष्टाध्यायीकण्ठपाठ: | | | | |
| 19. | धातुरूपकण्ठपाठ: | | | | |
| 20. | शास्त्रार्थविचार: | 1.<br>2. | | | |
| 21. | समस्यापूर्ति:* | | | | |
| 22. | अक्षरश्लोकी* | | | | |

* भवत्संस्थात: समस्यापूर्ते: अक्षरश्लोक्या: च निमित्तमेव पृथक्-पृथक् चितयो: नाम 21, 22 क्रमाङ्कयो: पुरत: कोष्ठके उल्लेखनीयम्। तौ अतिरिच्य भवत्संस्थाया: स्पर्धिगणस्य अन्येऽपि सदस्या: अनयो: स्पर्धयो: (समस्यापूर्तौ अक्षरश्लोक्यां च) स्वस्य इच्छामनुसृत्य भागं ग्रहीतुमर्हन्ति। तादृशानां नामानि निर्दिष्टपृथक्पत्रे (संलग्नयो: प्रपत्रसंख्या-2, प्रपत्रसंख्या-3 इत्यनयो:) प्रपूर्य एतेन पत्रेण सहैव प्रेषयेयु:।

**अस्मत्संस्थातः राज्यस्तरीयस्पर्धायै आगन्तॄणां संख्या-**

| बालकाः | बालिकाः | मार्गदर्शकः | मार्गदर्शिका | आहत्य सङ्ख्या पुरुषाः | स्त्रियः |
|---|---|---|---|---|---|
| | | | | | |

**प्रमाणीकरोमि यत् उपरि निर्दिष्टाः छात्राः अस्मत्संस्थायाम्/अस्मद्गुरुकुले/मत्सविधे अधीयानाः उपरि दर्शितरीत्या तत्तत्स्पर्धासु भागग्रहणाय आजिगमिषन्ति।**

**प्राचार्यस्य/संस्थाप्रमुखस्य हस्ताक्षरम्**
(गुरोः गृहे अधीयानानाम् आवेदनपत्रं चेत् गुरोः हस्ताक्षरम्)

नाम-

सङ्केतः-

छात्रदल-मार्गदर्शकस्य/मार्गदर्शिकायाः नाम

दूरवाणी-

**email-**

दूरवाणी-

**email-**

सूचना :- एतत् प्रपत्रं प्रपूर्य राज्यस्तरीय-शास्त्रीयस्पर्धायोजकसंस्थायै 30-9-2013 दिनाङ्कं यावत् प्रेषणीयम्।
राज्यस्तरीयस्पर्धायोजकानां सङ्केताः एतस्य नियमावलिपुस्तकस्य 14-15 पृष्ठयोः विद्यन्ते।

**प्रपत्रसङ्ख्या-2**

**राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली**

**राज्यस्तरीय-शास्त्रीयस्पर्धाः ( नवम्बर्/दिसम्बर- 2013 )**

## समस्यापूर्तिस्पर्धायै नामाङ्कनपत्रम्

समस्यापूर्तिनिमित्तमेव पृथक् चितस्य, यस्य नाम प्रपत्रसंख्या 1 इत्यत्र 21तमे कोष्ठके पूर्वमेव उल्लिखितं, तस्य नाम पुनः अत्र न लेखनीयम्। महाविद्यालयस्य/गुरुकुलस्य अर्हस्पर्धिगणस्य अन्ये ये सदस्याः (अन्यस्पर्धासु भागग्रहिणः) समस्यापूर्तौ अपि भागग्रहणम् इच्छन्ति तेषां नामाङ्कनम् अत्र भवेत्।

**संस्थायाः नाम** ..........................................................

**राज्यम्** ..........................................................

| क्र.सं | स्पर्धार्थिनः नाम ( देवनागर्या ) | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

प्राचार्यस्य/मार्गदर्शकस्य/मार्गदर्शिकायाः/गुरोः हस्ताक्षरम्

**प्रपत्रसङ्ख्या-3**

**राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली**

**राज्यस्तरीय-शास्त्रीयस्पर्धाः ( नवम्बर्/दिसम्बर - 2013 )**

## अक्षरश्लोकीस्पर्धायै नामाङ्कनपत्रम्

अक्षरश्लोकी-स्पर्धार्थमेव पृथक् चितस्य, यस्य नाम प्रपत्रसंख्या 1 इत्यत्र 22तमे कोष्ठके पूर्वमेव उल्लिखितं, तस्य नाम पुनः अत्र न लेखनीयम्। महाविद्यालयस्य/गुरुकुलस्य अर्हस्पर्धिगणस्य अन्ये ये सदस्याः (अन्यस्पर्धासु भागग्रहिणः) अक्षरश्लोक्याम् अपि भागग्रहणम् इच्छन्ति तेषां नामाङ्कनम् अत्र भवेत्।

**संस्थायाः नाम** ........................................................................................

**राज्यम्** ........................................................................................

| क्र.सं | स्पर्धार्थिनः नाम ( देवनागर्या ) | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

प्राचार्यस्य/मार्गदर्शकस्य/मार्गदर्शिकायाः/गुरोः हस्ताक्षरम्